✧˖°*❋ ❋*°˖✧

# શ્રી વેંકટેશ્વર સુપ્રભાતમ્

# Sri Venkateswara Suprabhatam

**in** gujarati

✧˖°*❋ ❋*°˖✧

# ॥ શ્રી વેંકટેશ્વર સુપ્રભાતમ્ ॥

કૌસલ્યા સુપ્રજા રામ પૂર્વાસંધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥ 1 ॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિંદ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાંત ત્રૈલોક્યં મંગળં કુરુ ॥ 2 ॥

માતસ્સમસ્ત જગતાં મધુકૈટભારેઃ
વક્ષોવિહારિણિ મનોહર દિવ્યમૂર્તે ।
શ્રીસ્વામિનિ શ્રિતજનપ્રિય દાનશીલે
શ્રી વેંકટેશ દયિતે તવ સુપ્રભાતમ્ ॥ 3 ॥

તવ સુપ્રભાતમરવિંદ લોચને
ભવતુ પ્રસન્નમુખ ચંદ્રમંડલે ।
વિધિ શંકરેંદ્ર વનિતાભિરર્ચિતે
વૃશ શૈલનાથ દયિતે દયાનિધે ॥ 4 ॥

અત્ર્યાદિ સપ્ત ઋષયસ્સમુપાસ્ય સંધ્યાં
આકાશ સિંધુ કમલાનિ મનોહરાણિ ।
આદાય પાદયુગ મર્ચયિતું પ્રપન્નાઃ
શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 5 ॥

પંચાનનાબ્જ ભવ ષણ્મુખ વાસવાદ્યાઃ
ત્રૈવિક્રમાદિ ચરિતં વિબુધાઃ સ્તુવંતિ ।
ભાષાપતિઃ પઠતિ વાસર શુદ્ધિ મારાત્
શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 6 ॥

ઈશત્-પ્રફુલ્લ સરસીરુહ નારિકેળ
પૂગદ્રુમાદિ સુમનોહર પાલિકાનામ્ ।
આવાતિ મંદમનિલઃ સહદિવ્ય ગંધૈઃ

શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 7 ॥

ઉન્મીલ્યનેત્ર યુગમુત્તમ પંજરસ્થાઃ
પાત્રાવસિષ્ટ કદલી ફલ પાયસાનિ ।
ભુક્ત્વાઃ સલીલ મથકેળિ શુકાઃ પઠંતિ
શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 8 ॥

તંત્રી પ્રકર્ષ મધુર સ્વનયા વિપંચ્યા
ગાયત્યનંત ચરિતં તવ નારદોડપિ ।
ભાષા સમગ્ર મસત્-કૃતચારુ રમ્યં
શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 9 ॥

ભૃંગાવળી ચ મકરંદ રસાનુ વિદ્ધ
ઝુંકારગીત નિનદૈઃ સહસેવનાય ।
નિર્યાત્યુપાંત સરસી કમલોદરેભ્યઃ
શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 10 ॥

યોષાગણેન વરદધ્નિ વિમથ્યમાને
ધોષાલયેષુ દધિમંથન તીવ્રઘોષાઃ ।
રોષાત્કલિં વિદધતે કકુભશ્ચ કુંભાઃ
શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 11 ॥

પદ્મેશમિત્ર શતપત્ર ગતાળિવર્ગાઃ
હર્તું શ્રિયં કુવલયસ્ય નિજાંગલક્ષ્મ્યાઃ ।
ભેરી નિનાદમિવ ભિભ્રતિ તીવ્રનાદમ્
શેષાદ્રિ શેખર વિભો તવ સુપ્રભાતમ્ ॥ 12 ॥

શ્રીમન્નભીષ્ટ વરદાખિલ લોક બંધો
શ્રી શ્રીનિવાસ જગદેક દયૈક સિંધો ।
શ્રી દેવતા ગૃહ ભુજાંતર દિવ્યમૂર્તે
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 13 ॥

શ્રી સ્વામિ પુષ્કરિણિકાપ્લવ નિર્મલાંગાઃ
શ્રેયાર્થિનો હરવિરિંચિ સનંદનાદ્યાઃ ।
દ્વારે વસંતિ વરનેત્ર હતોત્ત માંગાઃ
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 14 ॥

શ્રી શેષશૈલ ગરુડાચલ વેંકટાદ્રિ
નારાયણાદ્રિ વૃષભાદ્રિ વૃષાદ્રિ મુખ્યામ્ ।
આખ્યાં ત્વદીય વસતે રનિશં વદંતિ
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 15 ॥

સેવાપરાઃ શિવ સુરેશ કૃશાનુધર્મ
રક્ષોંબુનાથ પવમાન ધનાધિ નાથાઃ ।
બદ્ધાંજલિ પ્રવિલસન્નિજ શીર્ષદેશાઃ
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 16 ॥

ધાટીષુ તે વિહગરાજ મૃગાધિરાજ
નાગાધિરાજ ગજરાજ હયાધિરાજાઃ ।
સ્વસ્વાધિકાર મહિમાધિક મર્થયંતે
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 17 ॥

સૂર્યેંદુ ભૌમ બુધવાક્પતિ કાવ્યશૌરિ
સ્વર્ભાનુકેતુ દિવિશત્-પરિશત્-પ્રધાનાઃ ।
ત્વદ્દાસદાસ ચરમાવધિ દાસદાસાઃ
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 18 ॥

તત્-પાદધૂળિ ભરિત સ્ફુરિતોત્તમાંગાઃ
સ્વર્ગાપવર્ગ નિરપેક્ષ નિજાંતરંગાઃ ।
કલ્પાગમા કલનયાઽઽકુલતાં લભંતે
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 19 ॥

ત્વદ્ગોપુરાગ્ર શિખરાણિ નિરીક્ષમાણાઃ
સ્વર્ગાપવર્ગ પદવીં પરમાં શ્રયંતઃ ।
મર્ત્યા મનુષ્ય ભુવને મતિમાશ્રયંતે
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 20 ॥

શ્રી ભૂમિનાયક દયાદિ ગુણામૃતાબ્દે
દેવાદિદેવ જગદેક શરણ્યમૂર્તે ।
શ્રીમન્નનંત ગરુડાદિભિ રર્ચિતાંઘ્રે
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 21 ॥

શ્રી પદ્મનાભ પુરુષોત્તમ વાસુદેવ
વૈકુંઠ માધવ જનાર્ધન ચક્રપાણે ।
શ્રી વત્સ ચિહ્ન શરણાગત પારિજાત
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 22 ॥

કંદર્પ દર્પ હર સુંદર દિવ્ય મૂર્તે
કાંતા કુચાંબુરુહ કુટ્મલ લોલદૃષ્ટે ।
કલ્યાણ નિર્મલ ગુણાકર દિવ્યકીર્તે
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 23 ॥

મીનાકૃતે કમઠકોલ નૃસિંહ વર્ણિન્
સ્વામિન્ પરશ્વથ તપોધન રામચંદ્ર ।
શેષાંશરામ યદુનંદન કલ્કિરૂપ
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 24 ॥

એલાલવંગ ઘનસાર સુગંધિ તીર્થં
દિવ્યં વિયત્સરિતિ હેમઘટેષુ પૂર્ણમ્ ।
ધૃત્વાદ્ય વૈદિક શિખામણયઃ પ્રહૃષ્ટાઃ
તિષ્ઠંતિ વેંકટપતે તવ સુપ્રભાતમ્ ॥ 25 ॥

ભાસ્વાનુદેતિ વિકચાનિ સરોરુહાણિ
સંપૂરયંતિ નિનદૈઃ કકુભો વિહંગાઃ ।
શ્રીવૈષ્ણવાઃ સતત મર્થિત મંગળાસ્તે
ધામાશ્રયંતિ તવ વેંકટ સુપ્રભાતમ્ ॥ 26 ॥

બ્રહ્માદય-સ્સુરવરા-સ્સમહર્ષયસ્તે
સંતસ્સનંદન-મુખાસ્ત્વથ યોગિવર્યાઃ ।
ધામાંતિકે તવ હિ મંગળવસ્તુહસ્તાઃ
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 27 ॥

લક્શ્મીનિવાસ નિરવદ્ય ગુણૈક સિંધો
સંસારસાગર સમુત્તરણૈક સેતો ।
વેદાંત વેદ્ય નિજવૈભવ ભક્ત ભોગ્ય
શ્રી વેંકટાચલપતે તવ સુપ્રભાતમ્ ॥ 28 ॥

ઇત્થં વૃષાચલપતેરિહ સુપ્રભાતં
યે માનવાઃ પ્રતિદિનં પઠિતું પ્રવૃત્તાઃ ।
તેષાં પ્રભાત સમયે સ્મૃતિરંગભાજાં
પ્રજ્ઞાં પરાર્થ સુલભાં પરમાં પ્રસૂતે ॥ 29 ॥

✧˳·˖✶ ✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net